१. अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥

ततः प्रादेशमात्रां मूलाग्रयोर्घृतसंप्लुतां समिधं वन्हौ तूष्णीं हुत्वा पूजाप्रकरणोक्तक्रमेण शिरस्यञ्जलिमाधाय वामे-गुरुभ्यो नमः। परमगुरुभ्यो नमः। परापरगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। दक्षिणे-गं गणपतये नमः। मध्ये-इष्टदेवतायै बालायै नमः। इति नत्वा

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन यागकर्म समारभे ॥

इति सर्षपाक्षताः फट् इति मन्त्रेण परितो विकीर्य फट् इति नाराचमुद्रया ईशाने क्षिपेत् । फट् इत्यस्त्रमन्त्रेण ऊर्ध्वोर्ध्वक्रमेण तालत्रयपुरःसरं छोटिकाभिः

दशदिग्बन्धनं कृत्वा वन्हिप्राकारमुद्रया संरक्ष्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कृत्वा मातृकान्यासान्कुर्यात् । ततो मूलमन्त्रन्यासं कृत्वा स्वदेहे वन्हिजिह्वान्यासं कुर्यात्- तथाहि- स्रूँ हिरण्यायै नमः- लिङ्गे । ष्रूँ गगनायै नमः- पायौ । श्रूँ रक्तायै नमः मूर्ध्नि । व्रूँ कृष्णायै नमः मुखे । ल्रूँ सुप्रभायै नमः घ्राणे । प्रूँ बहुरूपायै नमः नेत्रे । य्रूँ अतिरिक्तायै नमः सर्वाङ्गे । स्रूँ अमर्त्याय नमः लिङ्गे । ष्रूँ पितृभ्यो नमः पायौ । श्रूँ गन्धर्वेभ्यो नमः मूर्ध्नि । व्रूँ यक्षेभ्यो नमः मुखे । ल्रूँ नागेभ्यो नमः घ्राणे । प्रूँ पिशाचेभ्यो नमः नेत्रे । य्रूँ राक्षसेभ्यो नमः सर्वाङ्गे ॥ इति वन्हिजिह्वातदधिपतिन्यासं कुर्यात् ।

ततः ऋष्यादिन्यासः- अग्निमन्त्रस्य भृगु ऋषिर्गायत्री छन्दोग्निर्देवता रँ बीजं स्वाहा शक्तिरग्नियजने विनियोगः । भृगवे ऋषये नमः शिरसि । गायत्री छन्दसे नमो मुखे । अग्नये देवतायै नमः हृदये । रँ बीजाय नमः गुह्ये । स्वाहायै शक्तये नमः पादयोः ॥

करन्यासः- ॐ सहस्रार्चिषे अङ्गुष्ठाभ्यां नमः । ॐ स्वस्तिपूर्णाय तर्जनीभ्यां स्वाहा । ॐ उत्तिष्ठपुरुषाय मध्यमाभ्यां वषट् ।

ॐ धूमव्यापिने अनामिकाभ्यां हुम्। ॐ सप्तजिह्वाय कनिष्ठिकाभ्यां वौषट्। ॐ धनुर्धराय करतलकरपृष्ठाभ्यां फट्॥

हृदयादिन्यासः- ॐ सहस्त्रार्चिषे हृदयाय नमः। ॐ स्वस्तिपूर्णाय शिरसे स्वाहा। ॐ उत्तिष्ठपुरुषाय शिखायै वषट्। ॐ धूमव्यापिने कवचाय हुम्। ॐ सप्तजिह्वाय नेत्राभ्यां वौषट्। ॐ धनुर्धराय अस्त्राय फट्॥

मूर्तिन्यासः- ॐ अग्नये जातवेदसे नमः मूर्ध्नि। ॐ अग्नये सप्तजिह्वाय नमः दक्षांसे। ॐ अग्नये हव्यवाहनाय नमः दक्षपार्श्वे। ॐ अग्नये अश्वोदरजाय नमः दक्षकटौ। ॐ अग्नये वैश्वानराय नमः लिङ्गे। ॐ अग्नये कौमारतेजसे नमः वामकटौ। ॐ अग्नये विश्वमुखाय नमः वामपार्श्वे। ॐ अग्नये देवमुखाय नमः वामांसे॥

पीठन्यासः- हृदि- ॐ मण्डूकाय नमः। ॐ कालाग्निरुद्राय नमः। ॐ आधारशक्तये नमः। ॐ मूलप्रकृतये नमः। ॐ कूर्माय नमः। ॐ अनन्ताय नमः। ॐ वराहाय नमः। ॐ पृथिव्यै नमः। ॐ अमृतार्णवाय नमः। ॐ रत्नद्वीपाय नमः। ॐ मणिमण्डपाय नमः।

CC-0. In Public Domain. Digitized by

ॐ कल्पवृक्षाय नमः। ॐ मणिवेदिकायै नमः। ॐ रत्नसिंहासनाय नमः। आग्नेय्यादि कोणेषु- ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। पूर्वादिदिक्षु- ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः॥ मध्ये ॐ आनन्दकन्दाय नमः। ॐ संविन्नालाय नमः। ॐ सर्वतत्वात्मकपद्माय नमः। ॐ प्रकृतिमयपत्रेभ्यो नमः। ॐ विकारमयकेसरेभ्यो नमः। ॐ पञ्चाशद्वर्णबीजाढ्यकर्णिकायै नमः। ॐ सूर्यमण्डलाय द्वादशकलात्मने नमः। ॐ सोममण्डलाय षोडशकलात्मने नमः। मँ वह्निमण्डलाय दशकलात्मने नमः॥

पीठशक्तिन्यासः- हृत्पद्मस्य पूर्वादिकेसरेषु- ॐ पीतायै नमः। ॐ श्वेतायै नमः। ॐ अरुणायै नमः। ॐ कृष्णायै नमः। ॐ धूम्रायै नमः। ॐ तीव्रायै नमः। ॐ स्फुलिङ्गिन्यै नमः। ॐ रुचिरायै नमः। मध्ये ज्वालिन्यै नमः। रँ वह्नियोगपीठाय नमः। इति विन्यस्य ध्यायेत्-

इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयन्तं जपाभम्।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्याये वह्निं बद्धमौलिं जटाभिः॥

इति ध्यात्वा वन्हिदेवतात्मकमात्मानं विचिन्त्य रँ आत्ममूर्तये वन्हये
नमः इति मानसैरुपचारैः पूजयेत् ॥

परिस्तरणम् - सामान्यार्घजलेन मेखलाः परिप्रोक्ष्य । त्रिमेखले
कुण्डे मध्यमेखलायां दक्षिणोत्तरयोः पूर्वाग्रैः, पूर्वपश्चिमयो
रुत्तराग्रैः गर्भशून्यैर्दर्भैः मूलभागानग्रभागैराच्छादयन्परिस्तरेत् ॥
परिधिच्छेदे पलाशादिवृक्षसम्भूतं सविष्टं हस्तमात्रं परिधिं नि
क्षिप्य तत्र ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः ।
इति पूजयेत् ॥

मेखलासु पूर्वादिप्रादक्षिण्येन ॐ वामायै नमः । ॐ ज्येष्ठायै
नमः । ॐ रौद्रै नमः । ॐ अम्बिकायै नमः । इति पूजयेत् ॥
कुण्डमध्ये रँ वन्हये आसनं कल्पयामि नमः । इति आसनं दत्वा ।
कुण्डे सचतुर्द्वारं चतुरस्रं तथा वृत्तमष्टदलकमलं विचिन्त्य तत्रमध्ये
ॐ मण्डूकाय नमः । ॐ कालाग्निरुद्राय नमः । ॐ आधारशक्तये
नमः । ॐ मूलप्रकृतये नमः । ॐ कूर्माय नमः । ॐ अनन्ताय नमः ।
ॐ वराहाय नमः । ॐ पार्थिव्यै नमः । ॐ अमृतार्णवाय नमः ।
ॐ रत्नद्वीपाय नमः । ॐ मणिमण्डपाय नमः । ॐ कल्पवृक्षाय

नमः। ॐ मणिवेदिकायै नमः। ॐ रत्नसिंहासनाय नमः। आग्नेयादिकोणेषु - ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। पूर्वादिदिक्षु - ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः॥ मध्ये - ॐ आनन्दकन्दाय नमः। ॐ संविन्नालाय नमः। ॐ सर्वतत्त्वात्मकपद्माय नमः। ॐ प्रकृतिमयपत्रेभ्यो नमः। ॐ विकारमयकेसरेभ्यो नमः। ॐ पञ्चाशद्वर्णबीजाढ्यकर्णिकायै नमः। अँ सूर्यमण्डलाय द्वादशकलात्मने नमः। ॐ सोममण्डलाय षोडशकलात्मने नमः। मँ वन्हिमण्डलाय दशकलात्मने नमः। सँ सत्त्वाय नमः। रँ रजसे नमः। तँ तमसे नमः। आँ आत्मने नमः। अँ अन्तरात्मने नमः। पँ परमात्मने नमः। ह्रीँ ज्ञानात्मने नमः। इति सम्पूज्य। वन्ह्यासनपद्मस्य पूर्वादिदलमूलेषु मध्ये च - ॐ पीतायै नमः। ॐ श्वेतायै नमः। ॐ अरुणायै नमः। ॐ कृष्णायै नमः। ॐ धूम्रायै नमः। ॐ तीव्रायै नमः। ॐ स्फुलिङ्गिन्यै नमः। ॐ रुचिरायै नमः। ॐ ज्वालिन्यै नमः। इति पीठशक्तीः सम्पूज्य रँ वन्हेर्योगपीठात्मने नमः इति पीठं पूजयेत्॥

तत्पीठोपरि मूलमन्त्रान्ते रँ वन्हेमूर्तिं कल्पयामि नमः। इति मूर्तिं प्रकल्प्य

इष्टं शक्तिं स्वस्तिकाभीतिमुच्चै र्दीर्घैर्दोर्भि र्धारयन्तं जपाभम्।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्याये वन्हिं बद्धमौलिं जटाभिः॥

इति ध्यात्वा-। ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा भगवन्नग्ने इहागच्छागच्छ- ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा- इत्यावाह्य रँ आवाहितो भव संस्थापितो भव इत्यावाहनादि मुद्राः प्रदर्श्य। ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ हंसः सोहं रँ वन्हेः प्राणाः इह स्थिताः। ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ हंसः सोहं रँ वन्हे जीव इह स्थितः। ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ हंसः सोहं रँ वन्हेः सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्र घ्राण प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति प्राणप्रतिष्ठां कुर्यात्॥

अग्निपूजनम्- ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इदं पाद्यं वन्हये नमः इत्यादिरीत्या पाद्यार्घाचमन स्नान गन्ध पुष्प धूप दीप नैवेद्य ताम्बूलानि निवेद्य। ॐ वैश्वा

Nepal Sanskrit University, Balmiki Campus, K

दलाग्रेषु पूर्वादितः- ॐ ब्राह्म्यैनमः। ॐ माहेश्वर्यैनमः। ॐ कौमार्यैनमः।
ॐ वैष्णव्यैनमः। ॐ वाराह्यैनमः। ॐ इन्द्राण्यैनमः। ॐ चामुण्डायै
नमः। ॐ महालक्ष्म्यैनमः। इत्यष्टमातॄः। तद्बहिः- ॐ असिताङ्गभैरवा
यनमः। ॐ रुरुभैरवायनमः। ॐ चण्डभैरवायनमः। ॐ क्रोधभैरवाय
नमः। ॐ उन्मत्तभैरवायनमः। ॐ कपालिभैरवायनमः। ॐ भीषणभै
वायनमः। ॐ संहारभैरवायनमः। इत्यष्टभैरवान्पूजयेत्॥

नरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा- श्री पादुकां पूजयामि नमः इति वारत्रयं पुष्पाञ्जलिमर्पयेत्॥

आवरणपूजनम्—

षट्कोणेषु मध्ये च- ईशानादिक्रमेण- स्प्रूँ हिरण्यायै नमः। ष्प्रूँ गगनायै नमः। र्प्रूँ रक्तायै नमः। व्प्रूँ कृष्णायै नमः। ल्प्रूँ सुप्रभायै नमः। प्रूँ बहुरूपायै नमः। य्प्रूँ अतिरक्तायै नमः। इति सप्त जिह्वाः पूजयेत् ॥

केसरेषु- आग्नेये ॐ सहस्रार्चिषे हृदयाय नमः। ईशाने ॐ स्वस्तिपूर्णाय शिरसे स्वाहा। नैरृत्ये ॐ उत्तिष्ठ पुरुषाय शिखायै वषट्। वायव्ये ॐ धूमव्यापिने कवचाय हुम्। मध्ये ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् इत्यङ्गदेवताः॥

चतुर्दिक्षु- ॐ धनुर्धरायास्त्राय फट्। पूर्वादिदलेषु- ॐ अग्नये जातवेदसे नमः। ॐ अग्नये सप्तजिह्वाय नमः। ॐ अग्नये हव्यवाहनाय नमः। ॐ अग्नये अश्वोदरजाय नमः। ॐ अग्नये वैश्वानराय नमः। ॐ अग्नये कौमारतेजसे नमः। ॐ अग्नये विश्वमुखाय नमः। ॐ अग्नये देवमुखाय नमः। इत्यष्टमूर्तीः॥

मेखलाश्रितदर्भेषु पूर्वादिक्रमेण- ॐ इन्द्राय नमः। ॐ अग्नये

नमः। अं यमाय नमः। अं निर्ऋतये नमः। अं वरुणाय नमः। अं वायवे नमः। अं कुबेराय नमः। अं ईशानाय नमः। इति दिक्पालान् ॥ तद्बहिः- अं वज्राय नमः। अं शक्तये नमः। अं दण्डाय नमः। अं खड्गाय नमः। अं पाशाय नमः। अं अङ्कुशाय नमः। अं गदायै नमः। अं शूलाय नमः। इत्यायुधानि पूजयेत्। मध्ये- अं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा। साङ्गाय सायुधाय सवाहनाय सालङ्काराय सपरिवाराय वन्हये श्रीपादुकां पूजयामि नमः। इति पूजयेत्॥

पात्रासादनम्-

स्ववामभागे प्रागग्रान्दर्भानास्तीर्य तदुपरि फट् इति मन्त्रेण जलेन प्रक्षालितानि युग्मरूपाणि स्रुक् स्रुव प्रोक्षणी प्रणीताज्य
परिधिं समित्स्रवकं च
स्थाली चरुस्थाल्यादि पात्राण्यधोमुखीकृत्य। विन्यस्य, तानि पवित्रेणोत्तानानि विधाय, पुनः प्रक्षाल्य, सामान्यार्घजलेन संप्रोक्षयेत्।

नमः इति शुद्धजलेन प्रोक्षणीपात्रमापूर्य अं वन्हिमण्डलाय दशकलात्मने नमः। अं सूर्यमण्डलाय द्वादशकलात्मने नमः। अं सोम

मण्डलाय षोडशकलात्मने नमः। इत्यभ्यर्च्य। ॐ गङ्गे च यमुने चैव इत्यङ्कुशमुद्रया सूर्यमण्डलात्तीर्थान्यावाह्य, फट् इति संरक्ष्य, हुम् इत्यवगुण्ठ्य, ॐ इति गन्धपुष्पाक्षतपवित्राणि (पवित्रमुद्गराणि) निक्षिप्य, कूर्चोपरि निधाय प्रणवेनाष्टवारमभिमन्त्र्य धेनुमुद्रां प्रदर्शयेत्।

प्रणीतापात्रमाधे नमः इति शुद्धजलेनापूर्य गन्धपुष्पाक्षतपवित्राणि तत्र निक्षिप्य, तज्जलं किञ्चित्प्रोक्षणीपात्रे निक्षिप्य, तज्जलेन नमः इति मूलमन्त्रं चोच्चार्य यागद्रव्याणि प्रोक्षेत्॥

पूर्वं ब्रह्मवरणाभावे इदानीं ब्रह्मणो वरणं कुर्यात्। कुण्डस्य दक्षिणतः कूर्चे ब्रह्माणं पूजयेत्।

स्रुक्स्रुव संस्कारः— ऊर्ध्वमुखौ स्रुक्स्रुवौ हस्ताभ्यां गृहीत्वा अधोमुखौ विधाय वारत्रयमग्नौ प्रताप्य वामहस्तेन तौ धृत्वा दक्षिणहस्तगृहीतैर्दर्भैरग्रेणाग्रं, मध्येन मध्यं, मूलेन मूलं शोधयेत्। सामान्यार्घप्रोक्षणीजलाभ्यां संप्रोक्ष्य पुनर्वह्नौ प्रताप्य दर्भानग्नौ प्राक्षिप्य, तत्कण्ठं त्रिःसूत्रेणावेष्ट्य स्वदक्षिणे कुशानास्तीर्य तदुपरि तौ स्थापयेत्॥

आज्यसंस्कारः— फट् इति मन्त्रितजलेन आज्यस्थालीं सम्प्रोक्ष्य, तस्यामाज्यं निधाय, मूलमन्त्रेण वीक्ष्य, अस्त्राय फट् इत्यर्घजलेन संप्रोक्ष्य, तेनैव मन्त्रेण दर्भैः संताड्य, हुम् इत्यर्घजलेनाभ्युक्ष्य, कुण्डादङ्गारान्

उद्धृत्य वायुकोणे संस्थाप्य तेष्वङ्गारेषु नमः इति आज्यस्थालीं स्थापयि-
त्वा तापयेत्। दर्भद्वयं प्रज्वाल्याज्ये निक्षिप्य दग्धशेषं नमः इति वन्हौ
क्षिपेत्। पुनर्ज्वलितेन दर्भद्वयेन हुम् इति आज्यं नीराज्य अग्नौ निक्षिपेत्।
प्रज्वालितं कुशमुष्टिं गृहीत्वा अस्त्राय फट् इति प्रदर्श्याग्नौ क्षिपेत्।
इति तापन पवित्रीकरणाभिद्योतनोद्योतनान्ते तस्मादङ्गारादाज्यस्था-
लीमुद्धृत्य आत्मसंमुखे स्थापयेत्। तानङ्गारानग्नौ प्रक्षिप्याङ्गार-
स्थानं संमार्ज्य जलं स्पृशेत्। उत्तान हस्तयोरङ्गुष्ठानामिकाभ्यां
प्रादेशमात्रं पवित्रं पृथक् पृथग्धृत्वा अस्त्राय फट् इति वन्हेः संमुख-
माज्यमुत्पुनीयात्। पवित्रं स्थानान्तरे संस्थाप्य तेनैव प्रकारेण
दर्भद्वयं गृहीत्वा तेन दर्भद्वयेन नमः इत्यात्मसंमुखमाज्यं संप्लाव्य पूर्व-
स्थापित पवित्रद्वयमेतद्दर्भद्वयं च वन्हौ क्षिपेत्॥

ततः प्रादेशमात्रं समूलं सग्रन्थि दर्भद्वयमाज्यस्थाल्यां घृतमध्ये निक्षिप्य
आज्यस्य दक्षिणभागं शुक्लपक्षं वामभागं कृष्णपक्षं विचिन्त्य, वामे
इडां दक्षिणे पिङ्गलां मध्ये सुषुम्नां ध्यात्वा होमं कुर्यात्-
नमः इति स्रुवेण दक्षिणभागाद्घृतमादाय ॐ अग्नये स्वाहा- अग्नय
इदं न मम इति अग्ने दक्षिणनेत्रे हुत्वा संपाताज्यं तत्रैव दक्षिणभागे क्षिपेत्।

नमः इति वामभागाद्घृतमादाय ॐ सोमायस्वाहा सोमायेदंनमम इति अग्नेर्वामलोचने हुत्वा संपाताज्यं तत्रैव वामभागे क्षिपेत् ।

नमः इति मध्यभागाद्घृतमादाय ॐ अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं नमम इति वन्हेर्ललाटनेत्रे हुत्वा संपाताज्यं मध्यभागे क्षिपेत् ।

ततः नमः इति दक्षिणभागादाज्यमादाय ॐ अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृते इदं नमम इति वन्हेर्वक्रे जुहुयात् ।

ततः- ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । भूर्भुवःस्वः स्वाहा । इति व्यस्तसमस्तव्याहृतिभिः पञ्चाहुती हुत्वा । ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा । इत्यनेन मन्त्रेण आहुतित्रयं दत्वा गर्भाधानादिषोडशसंस्कारान्कुर्यात् ।

ॐ अग्नेर्गर्भाधानं सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेः पुंसवनं सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेः सीमन्तोन्नयनं सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेर्जातकर्म सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेर्नालच्छेदं सम्पादयामि फट् स्वाहा- इति मूलाग्रयोर्घृतप्लुताः पञ्च समिधो जुहुयात् ।

ॐ वन्हेः सूतकं शोधयामि स्वाहा- इत्येकाहुतिं दत्वा, वन्हे त्वं बाला नामासि इति नामकृत्वा वन्हीश्वरदेवतयोरैक्यं विचिन्त्य, अग्नेर्नाम करणं सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेर्निष्क्रमणं सम्पादयामि स्वाहा- इत्यष्टाहुतीर्जुहुयात् ।

ॐ अग्नेरन्नप्राशनं " " "

ॐ अग्नेश्चूडाकरणं " " "

ॐ अग्ने रुपनयनं " " "

ॐ अग्नेर्महानाम्नव्रतं " " "

ॐ अग्ने र्महाव्रतं " " "

ॐ अग्ने रुपनिषद्व्रतं " " "

ॐ अग्ने र्गोदानव्रतं " " "

ॐ अग्नेः समावर्तनं " " "

ॐ अग्ने र्विवाहं " " "

मूलाग्रयोर्घृतप्लुताः समिधः आदाय ॐ क्लीं कामेश्वरी कामेश्वराभ्यां स्वाहा- इति त्रिवारं जुहुयात् ।

अग्नेः पितरौ कामेश्वरी कामेश्वरौ पञ्चोपचारैः सम्पूज्य प्रणम्य स्वहृदये उद्वासयेत् ।

सप्तजिह्वा होम:-

स्फ्रूँ हिरण्यायै स्वाहा। ष्फ्रूँ गगनायै स्वाहा। श्फ्रूँ रक्तायै स्वाहा।
व्फ्रूँ कृष्णायै स्वाहा। ल्फ्रूँ सुप्रभायै स्वाहा। र्फ्रूँ बहुरूपायै स्वाहा।
य्फ्रूँ आतिरक्तायै स्वाहा।

अङ्ग·मन्त्राहोम:-

आग्नेये- ईशाने-
^ॐ सहस्रार्चिषे हृदयाय नमः स्वाहा। ^ॐ स्वस्तिपूर्णाय शिरसे स्वाहा।
नैर्ऋत्ये- वायव्ये-
^ॐ उत्तिष्ठपुरुषाय शिखायै वषट् स्वाहा। ^ॐ धूमव्यापिने कवचाय हुं
मध्ये
स्वाहा। ^ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा। ॐ धनुर्धरायास्त्राय फट्
स्वाहा।

वह्निमूर्तिहोम:-

ॐ अग्नये जातवेदसे स्वाहा। ॐ अग्नये सप्तजिह्वाय स्वाहा। ॐ अग्नये हव्यवाहनाय स्वाहा। ॐ अग्नये अश्वोदरजाय स्वाहा। ॐ अग्नये वैश्वानराय स्वाहा। ॐ अग्नये कौमारतेजसे स्वाहा। ॐ अग्नये विश्वमुखाय स्वाहा। ॐ अग्नये देवमुखाय स्वाहा।

दिक्पालतदायुधहोम:-

ॐ इन्द्राय स्वाहा। ॐ अग्नये स्वाहा। ॐ यमाय स्वाहा। ॐ निर्ऋतये स्वाहा। ॐ वरुणाय स्वाहा। ॐ वायवे स्वाहा। ॐ कुबेराय स्वाहा।

ॐ ईशानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ॐ अनन्ताय स्वाहा ॥
ॐ वज्राय स्वाहा । ॐ शक्तये स्वाहा । ॐ दण्डाय स्वाहा । ॐ खड्गाय
स्वाहा । ॐ पाशाय स्वाहा । ॐ अङ्कुशाय स्वाहा । ॐ गदायै स्वाहा ।
ॐ त्रिशूलाय स्वाहा । ॐ पद्माय स्वाहा । ॐ चक्राय स्वाहा ॥
स्रुवेण चतुर्वारमाज्यमादाय स्रुचि निधाय स्रुवेणापिधाय शङ्खाग्रे
पुष्पादिकं दत्त्वोत्थाय — ॐ वैश्वानर जातवेद इहावह लोहिताक्ष
सर्वकर्माणि साधय स्वाहा वौषट् — इत्यागेमन्त्रेण जुहुयात् ॥
महागणपतिमन्त्रेण दशधा विभक्तेन दशाहुतयः —
ॐ स्वाहा । ॐ श्रीँ स्वाहा । ॐ श्रीँ ह्रीँ स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ
स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ स्वाहा ।
ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपतये स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गण
पतये वरवरद स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपतये वरवरद सर्व
जनं मे स्वाहा । ॐ श्रीँ ह्रीँ क्लीँ ग्लौँ गँ गणपतये वरवरद सर्वजनं मे
वशमानय स्वाहा ॥ अनेन समस्तमन्त्रेण पुनश्चतस्र आहुतीर्जुहु
यात् ॥

चरुपाकः—

आचार्यः प्राङ्मुखो नवं ताम्रादिपात्रमादाय फट् इति जलेन प्रक्षाल्य, तत्र तण्डुलानुसारेण गोक्षीरं निधाय, साधारं तत्पात्रं वन्हौ संस्थाप्य, पञ्चदशप्रसृतिपरिमितान् शालितण्डुलान् मूलमन्त्रेणाभिमन्त्र्य, तस्मिन्पात्रे निक्षिप्य, पिधानपात्रमादाय फट् इति जलेन प्रक्षाल्य, हुम् इति पिधानेन पाकपात्रं पिधाय, मूलमन्त्रेण चरुं पचेत्। स्रुवेणाज्यमादाय स्विन्ने चरौ मूलमन्त्रेणाभिघारयेत्। हुम् इति तत्पात्रमवतार्य फट् कुशास्तीर्णमण्डले स्थापयेत्। ततश्चरुं त्रिधा विभज्य एकं भागं पात्रान्तरे निधाय देवतायै समर्पयेत्। द्वितीयं भागं वक्ष्यमाणहोमार्थं, तृतीयं भागं भोजनार्थं स्थापयेत्। अग्नौ इष्टदेवतां सावरणां सम्पूज्य मूलमन्त्रेण स्वाहान्तेन पञ्चविंशत्याज्याहुतीर्मुखे हुत्वा, आत्माग्निदेवतानामैक्यं विचिन्त्य मूलेन एकादशाज्याहुतीर्हुत्वा, आवरणदेवताभ्योऽप्येकैकामाहुतिं दद्यात्।

बालादेव्या आवरणदेवताः—

ॐ रत्यै स्वाहा। प्रीत्यै। मनोभवायै॥ हृदयशक्त्यै। शिरःशक्त्यै। शिखाशक्त्यै। कवचशक्त्यै। नेत्रशक्त्यै। अस्त्रशक्त्यै। परब्रह्मानन्दनाथाय। परमेशानन्दनाथाय। पराशिवानन्दनाथाय। कामेश्वरानन्दनाथाय। कामानन्दनाथाय। मोक्षानन्दनाथाय। अमृतानन्दनाथाय॥ ईशानन्दनाथाय। तत्पुरुषानन्दनाथाय। अघोरानन्दनाथाय। वामदेवानन्दनाथाय। सद्योजातानन्दनाथाय॥ पञ्चोत्तरानन्दनाथाय। परमानन्दनाथाय। सर्वज्ञानन्दनाथाय। सर्वानन्दनाथाय। सिद्धानन्दनाथाय। गोविन्दानन्दनाथाय। शङ्करानन्दनाथाय॥ द्राविणीसहितमनोभवाय। क्षोभिणीसहितमकरध्वजाय। वशीकारिणीसहितकन्दर्पाय। आकर्षिणीसहितमन्मथाय। संमोहिनीसहितकामदेवाय। अनङ्गाय। अनङ्गकुसुमायै। अनङ्गमेखलायै। अनङ्गमदनायै। सुभगायै। महाभगायै। भगसर्पिण्यै। भगमालायै॥ ब्राह्मीसहितायासिताङ्गभैरवाय। माहेश्वरीसहिताय रुरुभैरवाय। कौमारीसहिताय चण्डभैरवाय। वैष्णवीसहिताय क्रोधभैरवाय। वाराहीसहितायोन्मत्तभैरवाय। माहेन्द्रीसहिताय कपालभैरवाय। चामुण्डासहिताय भीषणभैरवाय। महालक्ष्मीसहिताय संहारभैरवाय॥

कामरूपपीठाय। मलयपीठाय। कोल्लागिरिपीठाय। चौहारपीठाय।
कुलान्तकपीठाय। जालन्धरपीठाय। ओड्डीयानपीठाय। देवकूटपीठाय॥
हेतुकभैरवाय। त्रिपुरान्तकभैरवाय। वेतालभैरवाय। अग्निजिह्व
भैरवाय। कालान्तकभैरवाय। कपालिभैरवाय। एकपादभैरवाय।
भीमरूपभैरवाय। मलयभैरवाय। हाटकेशभैरवाय॥
इन्द्राय वज्रहस्ताय ऐरावतवाहनाय। अग्नये शक्तिहस्ताय मेषवाहनाय।
यमाय दण्डहस्ताय महिषवाहनाय। निर्ऋतये खड्गहस्ताय नरवाहनाय।
वरुणाय पाशहस्ताय मकरवाहनाय। वायवे ध्वजहस्ताय मृगवाहनाय।
सोमाय शङ्खहस्ताय अश्ववाहनाय। ईशानाय शूलहस्ताय वृषवाहनाय।
ब्रह्मणे पद्महस्ताय हंसवाहनाय। विष्णवे चक्रहस्ताय गरुडवाहनाय॥
गणपतये। वटुकाय। क्षेत्रपालाय। योगिनीभ्यः॥
अष्टवसुभ्यः। द्वादशादित्येभ्यः। एकादशरुद्रेभ्यः। सर्वभूतेभ्यः॥
विद्यायै। अक्षमालायै। अभयाय। वराय॥

कोटिहोमाद्यभीप्सित होमपूर्तौ मूलमन्त्रेण दशाहुतीः आवरणदेवताभ्य एकैकाहुतीर्हुत्वा पूर्णाहुतिं कुर्यात्-

होमावशिष्टेन घृतेन स्रुचमापूर्य पुष्पफलताम्बूलादिकं निधाय अधोमुखेन स्रुवेण स्रुचं पिधाय, तदग्रे पुष्पं दत्वा, मूलाङ्गुलं पञ्चका शङ्खमुद्रया स्रुक्स्रुवौ धृत्वा तन्मूले नाभिसंलग्ने कृत्वा। स्थितः सन् शाक्तो वामपादपुरःसरं वौषडन्तेन मूलमन्त्रेण पूर्णाहुतित्रयं दद्यात्।

ततो ब्रह्मार्पणमन्त्रेण पूर्णाहुतिः — इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा।

ततो नारिकेलादिफलं वह्नौ क्षिपेत्

वह्निस्थामिष्टदेवतां पञ्चोपचारैः सम्पूज्य प्रणम्य षडङ्गमन्त्रेण सकलीकृत्य संहारमुद्रया कुण्डादुद्धृत्य कलशे संयोज्य पूर्वादिदिक्षु स्थापितान् ध्रुवादीनिन्द्रादिलोकपालान् वहिःस्थिता अङ्गावरणदेवताश्च तत्तत्स्थानादुद्धृत्य प्रधानकलशे समानीय तासां देवतानामिष्टदेवतैक्यं विचिन्त्य वह्नेर्विसर्जनार्थं महाव्याहृतिभिर्जुहुयात् —

ॐ भूरग्नये पृथिव्यै च महते स्वाहा। ॐ भुवो वायवे अन्तरिक्षाय च दिवे च महते स्वाहा। ॐ स्वरादित्याय चन्द्रमसे दिग्भ्यश्च नक्षत्रेभ्यश्च स्वाहा। ॐ भूर्भुवःस्वश्चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महते स्वाहा। इति हुत्वा वन्हेर्जिह्वाङ्गमूर्तिमन्त्रौ लोकपालान्, तदायुधमन्त्रैश्चैकैकामाहुतिं जुहुयात्।

पयसा जलेन वा मेखलासु वन्हिं परिषिच्य वन्हिमोज पञ्चोपचारैः सम्पूज्य प्रार्थयेत्-

स्वस्ति श्रद्धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम्।
आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन॥
भो भो वन्हे महाशक्ते सर्वकर्मप्रसाधक।
कर्मान्तरेपि सम्प्राप्ते सान्निध्यं कुरु सादरम्॥

भो भगवन्नग्ने पूजितोसि क्षमस्वेति वन्हिं प्रणम्य संहारमुद्रया विसर्जेत्।

ततो दक्षिणादि दानं कृत्वा कर्म समापयेत्॥

Nepal Sanskrit University, Dalmoekh

Instructions to the boys.

1 Make it a motto of your lives, 'cleanliness is next to goodliness'.

2 Throw your waste papers in the bamboo basket in your class.

3 Do not leave your sores and bruises exposed

4 Do not wear dirty clothes, torn shirts and coloured dhoties

5 Always present a smart appearance

6 Use a cap invariably.

7 Always put on correct and clean dress for 'apparel atonce proclaimeth the man'.

CLASS ROUTINE

Days	1st Hour	2nd Hour	3rd Hour	4th Hour	5th Hour	6th Hour	7th Hour
Mon							
Tues							
Wed.							
Thurs							
Fri							
Satur							

Siddha L. P. Kashi

ॐ परब्रह्मणे नमः

स्नात नित्य क्रियो धृत भस्म त्रिपुण्ड्रो गृहीत पवित्रो जप कर्ता आसने उपविश्य

ॐ आसन मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः —

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम् ॥

ॐ आधारशक्तये कमलासनाय नमः । इत्यासनं संशोध्य, गायत्री मुच्चार्य —

ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते ।
तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्व मे ॥

इति शिखां बध्वा

ॐ ऋग्वेदाय स्वाहा । ॐ यजुर्वेदाय स्वाहा । ॐ सामवेदाय स्वाहा । इत्याचम्य । ॐ अथर्ववेदाय नमः इति करौ प्रक्षाल्य, ॐ वाक् वाक् (मुखे), ॐ प्राणः प्राणः (नासिकयोः), ॐ चक्षुः चक्षुः (नेत्रयोः), ॐ श्रोत्रं श्रोत्रं (कर्णयोः), ॐ नाभिः (नाभौ), ॐ हृदयं (हृदि), ॐ कण्ठः (कण्ठे), ॐ मुखं (मुखे), ॐ शिरः (शिरसि), ॐ शिखा (शिखायाम्), ॐ बाहुभ्यां यशो बलम् (बाहू) इत्युपस्पृश्य, —

ॐ अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥

इति भूतान्यपसार्य,

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

पुण्डरीकाक्षः पुनातु । इत्यात्मानं सम्प्रोक्ष्य । ॐ भूः पुनातु

(दक्षिणनासापुटे), ॐ भुवः पुनातु (वामनासापुटे), ॐ स्वः पुनातु (दक्षिणचक्षुषि), ॐ महः पुनातु (वामचक्षुषि), ॐ जनः पुनातु (दक्षिणश्रोत्रे), ॐ तपः पुनातु (वामश्रोत्रे), ॐ सत्यं पुनातु (शिरसि) अनामिकाङ्गुष्ठाभ्यामुपस्पृशेत्।

[redacted] ॐ भूर्भुवः स्वः इत्यात्मानं परितो जलेनाऽऽवेष्ट्य गायत्र्या तालत्रयेण दिग्बन्धनं कुर्यात्।

ततो मनसा विनियोगं स्मृत्वा प्राणायामः —

ॐकारस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता सर्वकर्मारम्भे विनियोगः। भूरादीनां सप्तानां व्याहृतीनां जमदग्नि भरद्वाज भृगु गौतम कश्यप विश्वामित्र वसिष्ठा ऋषयो गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्ति त्रिष्टुब्जगत्यश्छन्दांसि अग्नि वायु सूर्य बृहस्पति वरुणेन्द्र विश्वेदेवा देवताः प्राणायामे विनियोगः। तत्सवितुरित्यस्य विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता प्राणायामे विनियोगः। शिरसो ब्रह्म ऋषिर्गायत्री छन्दः परमात्मा देवता प्राणायामे विनियोगः। ॐ ब्रह्मणे ऋषये नमः (शिरसि), गायत्रीछन्दसे नमः (मुखे) परमात्मदेवतायै नमः (हृदि)। ॐ जमदग्नि भरद्वाज भृगु गौतम कश्यप विश्वामित्र वसिष्ठ ऋषिभ्यो नमः (शिरसि)। गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्ति त्रिष्टुब्जगती छन्दोभ्यो नमः (मुखे), अग्नि वायु सूर्य बृहस्पति वरुणेन्द्र विश्वेदेव देवताभ्यो नमः (हृदि)॥ ॐ विश्वामित्र ऋषये नमः (शिरसि), गायत्री छन्दसे नमः (मुखे), सवित्रे देवतायै नमः (हृदि)॥ ॐ ब्रह्मणे ऋषये नमः (शिरसि), गायत्री छन्दसे नमः (मुखे), परमात्मदेवतायै नमः (हृदि) इति विन्यस्य॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् — इति मन्त्रं [redacted] त्रिवारं पठित्वा प्राणायामत्रयं कुर्यात्॥ तत आचामेत्॥

ॐ द्रुपदादिवेत्यस्य कोकिलो राजपुत्र ऋषिरनुष्टुप्
छन्दः आपो देवता अघमर्षणे विनियोगः इति स्मृत्वा,
उदकेन जलमादाय तत्र नासाग्रं निधाय ॐ द्रुपदादिव
मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ इति तज्जलं भूमौ प्रक्षिप्य,

ततो मार्जनम् -

ॐ आपो हि ष्ठेति त्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्द
आपो देवता मार्जने विनियोगः । इति स्मृत्वा। ॐ आपो हि ष्ठा मयोभुवः ।
ॐ ता न ऊर्जे दधातन । ॐ महे रणाय चक्षसे । ॐ यो वः
शिवतमो रसः । ॐ तस्य भाजयतेह नः । ॐ उशतीरिव मातरः ।
ॐ तस्मा अरं गमाम वः (शिरसि) । ॐ यस्य क्षयाय जिन्वथ
(भूमौ) । ॐ आपो जनयथा च नः (शिरसि) ॥

ततो घमर्षणम् -

ॐ ऋतञ्चेत्यघमर्षणसूक्तस्य अघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवता अघमर्षणे विनियोगः इति स्मृत्वा।
ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत,
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ
धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्ष
मथो स्वः । इति करस्थं जलमाघ्राय भूमौ वामतः क्षिपेत् ॥
ततः - अन्तश्चरसीति मन्त्रस्य तिरश्चीन ऋषिरनुष्टुप्छन्द आपो देवता आचमने विनियोगः
इति स्मृत्वा, ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं वषट्कार
आपो ज्योती रसोऽमृतम् ॥ इत्याचामेत् ।
तत उत्थाय सम्पूर्णवाञ्जलिं गायत्र्या सपुष्पादिकेन जलेन
सूर्यायार्घ्यं दत्वा उपतिष्ठेत -

ॐ उद्वयमिति हिरण्यस्तूप ऋषि ~~गायत्री~~ अनुष्टुप् छन्दः सूर्यो देवता, उदुत्य
मिति प्रस्कण्व ऋषिर्गायत्री छन्दः सूर्यो देवता, चित्रमिति कौत्स
ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषि
रक्षरातीत पुर उष्णिक्छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः
इति स्मृत्वा ।-

ॐ उद्वयन्तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमम् ॥ ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ ॐ चित्रं देवानामुदगादनीकं चक्षु
र्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावा पृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छु
क्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च
शरदः शतात् ॥ [illegible] इत्युपस्थायोपविशेत् ॥

गायत्री शापविमोचनम्

~~गायत्रीमन्त्रं [illegible]~~ ॐ अजो अमरो नैव ब्रह्मयोनिर्नमोस्तु ते। ब्रह्मशापाद्विमुक्ता भव। वसिष्ठशापाद्विमुक्ता भव। विश्वामित्रशापाद्विमुक्ता भव॥ इति गायत्रीसम्पार्य।

ॐ अस्य श्री ब्रह्मशापमोचनमन्त्रस्य ब्रह्मा ऋषिर्भुक्ति मुक्तिप्रदा ब्रह्मशापमोचनी गायत्रीशक्तिर्देवता गायत्री छन्दो ब्रह्मशापविमोचने विनियोगः॥ ॐ गायत्रीं ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः। तां पश्यन्ति धीराः सुमनसा वाचामग्रतः॥ ॐ वेदान्तनाथाय विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्॥ ॐ देवी गायत्री त्वं ब्रह्मशापाविमुक्ता भव॥ इति त्रिवारं पठेत्॥ इति ब्रह्मशापमोचनम्॥

ॐ अस्य वसिष्ठशापमोचनमन्त्रस्य निग्रहानुग्रहकर्ता वसिष्ठ ऋषी वसिष्ठानुगृहीता गायत्री शक्तिर्देवता विश्वोद्भवा गायत्री छन्दो वसिष्ठशापविमोचने विनियोगः॥ ॐ सोऽहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः। आत्मज्योतिरहं शुक्रः सर्वज्योती रसोऽस्म्यहम्॥ ॐ देवी गायत्री त्वं वसिष्ठशापाविमुक्ता भव॥ इति त्रिवारं पठेत्॥ इति वसिष्ठशापमोचनम्॥

ॐ अस्य श्रीविश्वामित्रशापमोचनमन्त्रस्य नूतनसृष्टिकर्ता विश्वामित्र ऋषिर्विश्वामित्रानुगृहीता गायत्री शक्तिर्देवता वाग्देहा गायत्री छन्दो विश्वामित्रशापविमोचने विनियोगः॥ ॐ गायत्रीं भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवाः। देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये यन्मुखान्निःसृतोऽखिलवेदगर्भः॥ ॐ देवी गायत्री त्वं विश्वामित्रशापविमुक्ता भव॥ इति त्रिवारं पठेत्॥ इति विश्वामित्रशापमोचनम्॥

ॐ भूः अङ्गुष्ठाभ्यां नमः। ॐ भुवः तर्जनीभ्यां नमः। ॐ स्वः मध्यमाभ्यां नमः। ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः। ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां नमः। ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः॥ इति करन्यासः॥

तत्र [illegible] आचम्य विनियोगं सह न्यासं कुर्यात्—

ॐकारस्य ब्रह्मा ऋषिः दैवी गायत्री छन्दः परमात्मा देवता सर्वकर्मारम्भे विनियोगः। भूरादि[illegible]महाव्याहृतीनां परमेष्ठी प्रजापति ऋषिः अग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि। गायत्र्या विश्वामित्र ऋषिः गायत्री छन्दः सविता देवता मम यजमानस्याभीष्टसिद्ध्ये जपे विनियोगः।

ॐ ब्रह्मणे ऋषये नमः {शिरसि}, गायत्री छन्दसे नमः {मुखे}, परमात्मदेवतायै नमः {हृदि}। ॐ परमेष्ठि प्रजापति ऋषये नमः {शिरसि}, गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः {मुखे}, अग्निवायुसूर्य देवताभ्यो नमः {हृदि}। ॐ विश्वामित्र ऋषये नमः (शिरसि), गायत्री छन्दसे नमः (मुखे), सवित्री देवतायै नमः (हृदि)॥ इति ऋष्यादिन्यासः॥

ॐ ब्रह्मणे नमः {नाभौ}, उँ विष्णवे नमः {हृदि}, मँ शिवाय नमः {मूर्ध्नि}॥ इति प्रणवन्यासः॥

ॐ भूः हृदयाय ~~अङ्गुष्ठाभ्यां~~ नमः। ॐ भुवः शिरसे स्वाहा ~~तर्जनीभ्यां नमः~~। ॐ स्वः शिखायै वषट्। ॐ तत्सवितुर्वरेण्यं कवचाय हुम्। ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय [illegible] वौषट्। ॐ धियो यो नः प्रचोदयात् अस्त्राय फट्॥ इति अङ्गन्यासः॥

ॐ भूः नमः— हृदये। ॐ भुवः नमः— मुखे। ॐ स्वः नमः— दक्षिणस्कन्धे। ॐ महः नमः— वामस्कन्धे। ॐ जनः नमः— दक्षोरौ। ॐ तपः नमः— वामोरौ। ॐ सत्यं नमः— जठरे॥ इति व्याहृतिन्यासः॥

ॐ तत् नमः— पादाङ्गुलिमूलयोः। ॐ सं नमः— गुल्फयोः। ॐ विं नमः— जानुनोः। ॐ तुं नमः— ऊरुमूलयोः। ॐ वं नमः— लिङ्गे। ॐ रें नमः— नाभौ। ॐ णिं नमः— हृदये। ॐ यं नमः— कण्ठे। ॐ भँ नमः— करांगुलिमूलयोः। ॐ गौं नमः— मणिबन्धयोः। ॐ दें

University, Balmeeki Campus mandu

नमः- कूर्परयोः। ॐ वं नमः- भुजमूलयोः। ॐ स्यं नमः- मुखे। ॐ धीं नमः- नासापुटयोः। ॐ मं नमः- कपोलयोः। ॐ हिं नमः- अक्ष्णोः। ॐ धिं नमः- कर्णयोः। ॐ यों नमः- भ्रुवोः। ॐ यों नमः- शिरसि। ॐ नः नमः- पश्चिमवक्त्रे (चूडाधः)। ॐ प्रं नमः- उत्तर वक्त्रे (वामकर्णे)। ॐ चों नमः- दक्षिणवक्त्रे (दक्षकर्णे)। ॐ दं नमः- पूर्ववक्त्रे (मुखे)। ॐ यां नमः- ऊर्ध्ववक्त्रे (मस्तके)। ॐ त् नमः- सर्वाङ्गे॥ इति वर्णन्यासः॥

ॐ तत् नमः- शिरसि। ॐ सवितु नमः- भ्रूमध्ये। ॐ वरेण्यं नमः- अक्ष्णोः। ॐ भर्गो नमः- मुखे। ॐ देवस्य नमः- कण्ठे। ॐ धीमहि नमः- हृदये। ॐ धियो नमः- नाभौ। ॐ यो नमः- गुह्ये। ॐ नः नमः- जान्वोः। ॐ प्रचोदयात् नमः- पादयोः। ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम् -शिरसि॥ इति पदन्यासः॥

ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः। ॐ वरेण्यं विष्ण्वात्मने शिरसे स्वाहा। ॐ भर्गो देवस्य रुद्रात्मने शिखायै वषट्। ॐ धीमहि ईश्वरात्मने कवचाय हुम्। ॐ धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् सर्वात्मने अस्त्राय फट्॥ इति षडङ्गन्यासः॥

ॐ भूः नमः- पादयोः। ॐ भुवः नमः- जान्वोः। ॐ स्वः नमः- कट्याम्। ॐ महः नमः- नाभौ। ॐ जनः नमः- हृदये। ॐ तपः नमः- कण्ठे। ॐ सत्यं नमः- ललाटे। ॐ परब्रह्मणे नमः- शिरसि॥ इति पुन व्याहृतिन्यासः॥

ॐ तत्सवितुः हृदयाय नमः। ॐ वरेण्यं शिरसे स्वाहा। ॐ भर्गो देवस्य शिखायै वषट्। ॐ धीमहि कवचाय हुम्। ॐ धियो यो नः नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् अस्त्राय फट्॥ इति पुनः षडङ्गन्यासः॥

ततो गायत्र्यावाहनम्—

ॐ तेजोसीत्यस्य देवा ऋषयः पङ्क्तिश्छन्दः शुक्रं देवता गायत्र्यावाहने विनियोगः ॥ ॐ तेजोसि शुक्रमस्यमृत[illegible]मासि धामनामासि । प्रियन्देवानामनाधृष्टं देवयजनमासि ॥

ॐ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्रि छन्दसां मातर्ब्रह्मयोने नमोस्तु ते ॥

इति सूर्यमण्डलात्तेजोरूपां गायत्रीं हृद्यावाह्य—

ॐ तुरीयपदस्य प्रजापति ऋषिर्गायत्री छन्दः परमात्मा देवता गायत्र्युपस्थाने विनियोगः ॥ ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोम् ॥ इत्युपस्थाय ध्यायेत्—

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्वात्मवर्णात्मिकाम् ॥
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

~~सूर्यनारायणध्यानम्—~~

~~ध्येयः सदा सवितृमण्डलमध्यवर्ती~~
~~नारायणः सरसिजासनसन्निविष्टः ।~~
~~केयूरवान्मकरकुण्डलवान् किरीटी~~
~~हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥~~

इति ध्यात्वा मालां गृहीत्वा—

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥

इति सम्प्रार्थ्य मौनी मुखहस्तौ प्रावृत्य शिरः मन्त्रार्थं चिन्तयन् १०८ जपं कुर्यात्—

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

thmandu

जपान्ते — ह्रीँ क्लीं ऐं नमः

त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम।
शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥

इति मालां सम्मार्ज्य
ॐ आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः त्रिष्टुप्छन्दः सविता देवता सूर्यस्तुतौ विनि-
योगः॥ ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥
ॐ विश्वतश्चक्षुरित्यस्य विश्वकर्मा भौवन ऋषिः त्रिष्टुप्छन्दः विश्वकर्मा देवता प्रदक्षिणायां विनियोगः।
इति सूर्यं नत्वा, ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्व-
तो बाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावा
भूमी जनयन्देव एकः॥ इति प्रदक्षिणी कृत्वा, गायत्रीहृदेवताय
नमस्कुर्यात् ॥

ततो जपनिवेदनम् —

ॐ देवागातु विद इत्यस्य मनसस्पति ऋषिर्वातो देवता
विराट् छन्दो जपनिवेदने विनियोगः॥ ॐ देवागातु
विदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देव यज्ञꣳ स्वाहा
वाते धाः॥

ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरी ॥

इति जलं समर्पयेत् ॥ ~~[illegible]~~

~~[illegible]~~

सन्ध्यागयोपासने विशेषः —

(१) प्राणायामोत्तर माचमनमन्त्रभेदः- (एके पक्षौ)

प्रातः— ॐ सूर्यश्चमेति हिरण्यगर्भ ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः। ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि। इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ इत्याचामेत् ॥

मध्यान्हे — ॐ आपः पुनन्त्विति विष्णुर्ऋषिरनुष्टुप्छन्द आपो देवता अपामुपस्पर्शने विनियोगः। ॐ आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम्। यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳ स्वाहा ॥ इत्याचामेत् ॥

सायम् — ॐ अग्निश्चमेति रुद्र ऋषिः पङ्क्तिश्छन्दोग्निर्देवता अपामुपस्पर्शने विनियोगः। ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना। अहस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि। इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ इत्याचामेत् ॥

Digitized by eGangotri. Funding: MIDF

(२) आवाहने [illegible] विशेष:— (पर्के पढ्नौ)

प्रात:— ॐ गायत्रीं त्र्यक्षरां वालां साक्षसूत्र कमण्डलुम्।
रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थिताम्॥
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम्।
ऋग्वेदकृतोत्सङ्गां साङ्ख्यायनगोत्रजाम्॥
आवाहयाम्यहं देवीं गायत्रीं सूर्यमण्डलात्॥
आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि।
गायत्रि छन्दसां मातर्ब्रह्मयोने नमोस्तु ते॥

मध्यान्हे— सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रिलोचनाम्।
त्रिशूलिनीं वृषारूढां यजुर्वेदेन संयुताम्॥
रुद्राणीं रुद्रदैवत्यां रुद्रलोकनिवासिनीम्।
कैलासनिहितावासां मायान्तीं सूर्यमण्डलात्॥
वरदां त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहम्॥
आगच्छ वरदे देवि त्र्यक्षरे रुद्रवादिनि।
सावित्रि छन्दसां माता रुद्रयोने नमोस्तु ते॥

सायं— वृद्धां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम्।
शङ्खचक्रगदापद्महस्तां गरुडवाहिनीम्॥
वदर्याश्रमवासां तामायान्तीं सूर्यमण्डलात्।
सामवेदकृतोत्सङ्गां वनमालाविभूषिताम्॥
वैष्णवीं त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहम्।
आगच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनि।
सरस्वति छन्दसां मातर्विष्णुयोने नमोस्तु ते॥

ॐ परब्रह्मणे नमः

स्नानेसक्रियो धृतपवित्रो अपकर्त्ताऽऽसन उपविश्य—

ॐ आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः ।

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥

ॐ आधारशक्त्यै कमलासनाय नमः । इत्यासनं संशोध्

~~इत्यासनं संशोध्य~~

गायत्री प्रार्थना—

ॐ त्रिदूपीठे महामाये दिव्यतेजःसमन्विते ।
त्वं च धारय मां नित्यं पवित्रं

कवचपाठः –

याज्ञवल्क्य उवाच ।

स्वामिन्सर्वजगन्नाथ संशयोऽस्ति मम प्रभो ।
चतुःषष्टिकलाभिज्ञ पातकाद्योगविद्वर ॥
मुच्यते केन पुण्येन ब्रह्मरूपः कथं भवेत् ।
देहश्च देवतारूपो मन्त्ररूपो विशेषतः ॥
कर्मतः श्रोतुमिच्छामि न्यासं च विधिपूर्वकम् ।

ब्रह्मोवाच ।

अस्य श्रीगायत्रीकवचस्तोत्रमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणि छन्दांसि परब्रह्मस्वरूपिणी गायत्री देवता तद्बीजं भर्गः शक्तिः धियः कीलकं मोक्षार्थे जपे विनियोगः ॥ ॐ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः । ॐ वरेण्यं विष्णवात्मने शिरसे स्वाहा । ॐ भर्गो देवस्य रुद्रात्मने शिखायै वषट् । ॐ धीमहि ईश्वरात्मने कवचाय हुम् । ॐ धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट् । ॐ प्रचोदयात्परब्रह्मतत्त्वात्मने अस्त्राय फट् ॥ भूर्भुवः स्वोम् इति दिग्बन्धः ॥ अथ ध्यानम् –

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्रह्मसन्ध्या तु मे पश्चादुत्तरस्यां सरस्वती ॥ १
कौशाग्नि रूपिणी
पावकीं च दिशं रक्षेत्पाव~~कोज्ज्वलशालिनी~~ ।
यातुधानीं दिशं रक्षेद्यातुधानभयङ्करी । [illegible] पवमानीं दिशं रक्षेत्पवमानविलासिनी
दिशं रौद्रीं च मे पातु रुद्राणी रुद्ररूपिणी ॥ २
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ।

…igitized by eGangotri. Funding: MIDF

एवं दश दिशो रक्षेत्सर्वाङ्गे भुवनेश्वरी ॥३
तत्पदं पातु मे पादौ, जङ्घे मे सवितुः पदम् ।
वरेण्यं कटिदेशे तु, नाभिं भर्गस्तथैव च ॥४
देवस्य मे तु हृदयं, धीमहीति च गल्लयोः ।
धियः पदं च मे नेत्रे, यः पदं मे ललाटके ॥५
नः पदं पातु मे मूर्ध्नि, शिखायां मे प्रचोदयात् ।
तत्पदं पातु मूर्धानं, सकारः पातु भालकम् ॥६
चक्षुषी तु विकारार्णो, तुकारस्तु कपोलयोः ।
नासापुटे वकाराख्य, रेकारस्तु मुखे तथा ॥७
णिकार ऊर्ध्व ओष्ठे तु, यंकारस्त्वधरोष्ठके ।
आस्यमध्ये भकारस्तु र्गोकारश्चिबुके तथा ॥८
देकारः कण्ठदेशे तु, वकारः स्कन्धदेशके ।
स्यकारो दक्षिणे हस्ते, धीकारो वामहस्तके ॥९
मकारो हृदयं रक्षेत्, हिकार उदरे तथा ।
धिकारो नाभिदेशे तु, योकारस्तु कटिं तथा ॥१०
गुह्यं रक्षतु योकार, ऊ[illegible]णी नः पदाक्षरम् ।
प्रकारो जानुनी रक्षेत्, चोकारो जङ्घदेशकम् ॥११
दकारो गुल्फदेशे तु, याकारः पादयुग्मकम् ॥
तकारव्यञ्जनं चैव देवताभ्यो नमो नमः ॥१२
इदं तु कवचं दिव्यं बध्वा शत्रून्विनाशयेत् ।
चतुःषष्टिकला विद्या अज्ञाघातेन पातकैः ।
मु[illegible]च्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥१३

इति गायत्री कवचं सम्पूर्णं शुभम् ॥

जपान्ते
[redacted], द्विराचम्य ~~सव्याङ्गुष्ठेन~~ मृगीमुद्रया हंसीमुद्रया वा, सर्वं कुर्या
हवनान्ते पुनर्न्यासः —

ॐ ब्रह्मणे ऋषये नमः — शिरसि । गायत्री छन्दसे नमः —
मुखे । परमात्म देवतायै नमः — हृदि ॥ ॐ व्याहृति प्रजापति ऋष-
ये नमः — शिरसि । गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः — मुखे ।
अग्निवायुसूर्यदेवताभ्यो नमः — हृदि ॥ ॐ विश्वामित्र ऋषये
नमः — शिरसि । गायत्री छन्दसे नमः — मुखे । सवित्रे देवतायै
नमः — हृदि ॥ इति गायत्र्यादिन्यासः ॥

ॐ भूः अङ्गुष्ठाभ्यां नमः । ॐ भुवः तर्जनीभ्यां नमः । ॐ स्वः
मध्यमाभ्यां नमः । ॐ तत्सवितुर्वरेण्यमनामिकाभ्यां नमः ।
ॐ भर्गो देवस्य धीमहि । कनिष्ठिकाभ्यां नमः । ॐ धियो
यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥

ॐ भूः हृदयाय नमः । ॐ भुवः शिरसे स्वाहा । ॐ स्वः शिखायै
वषट् । ॐ तत्सवितुर्वरेण्यं कवचाय हुम् । ॐ भर्गो देवस्य
धीमहि नेत्रत्रयाय वौषट् । ॐ धियो यो नः प्रचोदयात्
अस्त्राय फट् ॥ इति अङ्गन्यासः ॥

तत्र आचम्य प्रणम्य प्रार्थयेत् —
नमस्ते देवि गायत्रि सावित्रि त्रिपदेऽक्षरे ।
अजरे अमरे मातस्त्राहि मां भवसागरात् ॥ १
कर्मणा मनसा वाचा गायत्री त्वं गतिर्मम ।
अनाथानां भूतानां इष्टी त्वं परमेश्वरि ॥ २
देवी दात्री च भोक्त्री च देवी सर्वमिदं जगत् ।
देवी जयति सर्वत्र या देवी सोऽहमेव च ॥
हीनो [redacted] विभक्ति वर्णैश्च व्यञ्जनैश्च स्वरैस्तथा ।
जपो मे क्षम्यतां देवि प्रसादं कुरु किङ्करे ॥ ३
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादात् सुरेश्वरि ॥ ४
मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यज्जपम् ।
तत्सर्वं क्षम्यतां [redacted] देवि प्रसीद परमेश्वरि ॥ ५
— इति प्रार्थना ।


अ

मधुपर्कविधिः -

श्रीः॥ प्रत्यङ्मुखो यजमानः प्राङ्मुखं मूर्ध्वजानुं अर्हणीयं सम्बोध्य -

ॐ साधु भवानास्तामित्यस्य प्रजापति ऋषिर्यजुर्ब्रह्मा देवता अर्चने विनियोगः।

ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम् - इति ब्रूयात्।

अर्हणीयः - ॐ अर्चय - इति प्रतिब्रूयात्।

उपवेशनार्थं पञ्चविंशतिदर्भतृणमयं बाहुमात्रं विष्टरमादाय ॐ विष्टरो विष्टरो विष्टरः - इत्यन्येनोक्ते, यजमानः ॐ विष्टरः प्रतिगृह्यता[illegible]ति वदेत्। अर्हणीयः - ॐ विष्टरं प्रतिगृह्णामि- इत्युक्त्वा विष्टरं गृहीत्वा -

ॐ वर्ष्मोऽस्मीत्याथर्वण ऋषिः अनुष्टुप्छन्दो विष्टरो देवता [illegible] आत्मस्तुतिपूर्वकोपवेशने विनियोगः।

ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासति॥

इत्यनेन आसने उत्तराग्रं निधाय विष्टरोपरि उपविशति।

ततो यजमानः पाद्यमञ्जलिनादाय ॐ पाद्यं पाद्यं पाद्यम् - इत्यन्येनोक्ते, ॐ पाद्यं प्रतिगृह्यताम् - इति वदेत्। अर्हणीयः ॐ पाद्यं प्रतिगृह्णामि - इत्युक्त्वा यजमानाञ्जलितः स्वाञ्जलिना पाद्यं गृहीत्वा -

ॐ विराजो दोहोऽसीति प्रजापति ऋषिर्यजुः आपो देवता [illegible] पादप्रक्षालने विनियोगः।

ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः॥

इति दक्षिणपादं प्रक्षाल्य पुनस्तथैव वामपादं प्रक्षालयति। ततः पूर्ववद्द्वितीयं विष्टरं गृहीत्वा चरणयोरधस्तादुत्तराग्रं निदध्यात्।

ततो दूर्वाक्षतफलजलचन्दनयुतार्घपात्रं गृहीत्वा यजमानः ॐ अर्घोऽर्घोऽर्घः— इत्यन्येनोक्ते, ॐ अर्घः प्रतिगृह्यताम्— इति वदेत्। अर्हणीयः ॐ अर्घं प्रतिगृह्णामि— इत्यभिधाय यजमानहस्तादर्घं गृहीत्वा—

ॐ आपः स्थेति प्रजापति ऋषिर्यजुरापो देवता[redacted] अर्घग्रहणे विनियोगः।

ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानि।

इत्युक्त्वा स्वशिरसि किञ्चिदक्षतादिकं दत्वा—

ॐ समुद्रं व इत्याथर्वण ऋषि[redacted] त्रिष्टुप्छन्दो[redacted] आपो देवता अभिमन्त्रणे विनियोगः।

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टा स्माकं वीरा मा परासेचि मत्पयः॥

[redacted] इति पठन्नर्घपात्रमैशान्यां त्यजति।

ततो यजमान आचमनीयमादाय ॐ आचमनीयमाचमनीयमाचमनीयम्— इत्यन्येनोक्ते, ॐ आचमनीयं प्रतिगृह्यताम्— इति वदेत्। अर्हणीयः ॐ आचमनीयं प्रतिगृह्णामि— इत्युक्त्वा यजमानहस्तादाचमनीयमादाय—

ॐ आमागन्निति परमेष्ठी ऋषिर्बृहती छन्द आपो देवता आचमने विनियोगः।

ॐ आ मागन्यशसा संसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥

इति सकृदाचामति द्विस्तूष्णीम्।

ततो यजमानः कांस्यपात्रस्थं दधिमधुघृतं कांस्यपात्रापिहितमादाय ॐ मधुपर्को मधुपर्को मधुपर्कः— इत्यन्येनोक्ते, ॐ मधुपर्कः प्रतिगृह्यताम्— इति वदेत्। अर्हणीयः ॐ मधुपर्कं प्रतिगृह्णामि— इत्यभिधाय—

ॐ मित्रस्य त्वेति प्रजापति ऋषि: पङ्क्तिश्छन्दो मित्रो देवता
मधुपर्कावेक्षणे विनियोग: ।
ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥
इति दातृकरस्थमेव निरीक्ष्य—
ॐ देवस्य त्वेति बृहस्पतिराङ्गिरस ऋषिर्यजु: सविता देवता
मधुपर्कग्रहणे विनियोग: ।
ॐ देवस्य त्वा सवितु: प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
प्रतिगृह्णामि ॥
इत्यनेन मधुपर्कपात्रं हस्ताभ्यां गृहीत्वा वामहस्ते धृत्वा—
ॐ नम: श्यावेति प्रजापति ऋषिर्यजु: सविता देवता मधुपर्का-
लोडने विनियोग: ।
ॐ नम: श्यावास्यायान्नशने यत्त ऽआविद्धं तत्ते निष्कृन्तामि ॥
इत्यनामिकया प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्-
भूमौ निक्षिपेत् पुनस्तथैव द्विर्निक्षिपेत् ।

ॐ यन्मधुन इति कुत्स ऋषिर्जगती छन्दो मधुपर्को देवता मधु-
पर्कप्राशने विनियोग: ।

ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम् । तेनाहं मधुनो
मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि ॥

इति अनामिकाङ्गुष्ठाभ्यां त्रि: प्राश्नाति । प्रतिप्राशने मन्त्रपाठ: । तत:
प्राशितमधुपर्कशेषमसञ्चरदेशे निदध्यात् । तत आचम्य—

ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठी ऋषिर्दैवी गायत्री छन्द:
परमात्मा देवता प्राणस्पर्शने विनियोग: ।
ॐ वाङ्म आस्येऽस्तु — इति कराग्रेण मुखम्,
ॐ नसोर्मे प्राणोऽस्तु — इति अङ्गुष्ठतर्जनीभ्यां नासिके,
ॐ अक्ष्णोर्मे चक्षुरस्तु - इति अङ्गुष्ठानामिकाभ्यां नयनद्वयम्,

ॐ कर्णयोर्मे श्रोत्रमस्तु — इति [redacted] दक्षिणोत्तरकर्णौ,
ॐ बाह्वोर्मे बलमस्तु — इति संहताङ्गुल्यग्रै युगपद्वाहुमूले,
ॐ ऊर्वोर्मे ओजोस्तु — इति असंहताङ्गुलिभ्यां पाणिभ्यां युगपदूरू,
ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु — इति शिरः
प्रभृति पादान्तमुभाभ्यां पाणिभ्यां स्पृशेत् ।

ततः ॐ गौर्गौर्गौः — इत्यु[redacted]क्ते, अर्हणीयः कुशतरुणमादाय-
ॐ माता रुद्राणामिति ब्रह्म ऋषिस्त्रिष्टुप्छन्दो गौर्देवता
गोरभिमन्त्रणे विनियोगः ।
ॐ माता रुद्राणां दुहिता वसूनाᳪ स्वसादित्यानाममृ-
तस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागा-
मदितिं वधिष्ट ॥ मम चामु[redacted] (अमुकगोत्रप्रवरनाम्नः)
यजमानस्य च पाप्मा हतः — [redacted] इत्युपांशु पठित्वा
~~इत्युपांशु पठित्वा, ॐ उत्सृजत तृणान्यत्तु — इत्युच्चै~~
ॐ उत्सृजत तृणान्यत्तु — इत्युच्चैरुक्त्वा कुशतरुणमुत्सृजेत् ॥

इति मधुपर्कविधिः ॥

itized by eGangotri Funding: MIDF

प्रातराचमनम् -

प्रातः- ॐ सूर्यश्चमेति हिरण्यगर्भ ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः। ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च [illegible] मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण ।शिश्ना। रात्रिस्तदवलुम्पतु यत्किञ्चिद्दुरितं मयि। इदमहं मामममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा।

Digitized by eGangotri Funding: MIDF

कोणादि दिशामा पताकाको रंग —

	[illegible]	[illegible]	वाहन
इन्द्र- पूर्व —	पहेंलो	रातो	हात्ती
आग्नेय-	रातो धुवाँलो	चित्र	बोको
यम- दक्षिण —	कालो	भैंसो	राँगो
निर्ऋति-नैऋत्य-	कालो	फुस्रो	सिंह
वरुण- पश्चिम-	सेतो	आसमानी	माछो
वायु- वायव्य-	ध्वाँसे	हरियो	मृग
कुबेर- उत्तर -	रातो धुवाँलो	सेतो	घोडा
ईशान ईशान-	रातो	सेतो	बयल

शारदातिलक—
मातङ्गछागमहिषं सिंहमकरैणवाजिनः
वृषभं च यथासंख्यं ध्वजमध्ये समालिखेत्।
पताका आयुधाकृताः

[illegible] शाखोपशाखे— [illegible] —

पूर्व-	पहेंलो	हात्ती-	वज्र
आग्नेय-	रातो	बोको -	शक्ति
दक्षिण -	कालो	राँगो -	दण्ड
नैर्ऋत्य -	नीलो	प्रेत -	खड्ग
पश्चिम-	सेतो	ग्राह -	पाश
वायव्य-	ध्वाँसे	मृग -	
उत्तर -	पहेंलो	विमान -	गदा
ईशान -	सेतो	बयल -	त्रिशूल
अनन्त -	सेतो	[illegible]	शाला
ब्रह्मा -	रातो		

कमण्डलु.

[illegible]

itized by eGangotri Funding: MIDF

गायत्री [illegible] [illegible]-

५४ [illegible] [illegible]-
[illegible]:
इदं वै [illegible] आवश्यकम्.
ततः [illegible] गायत्री [illegible] तत्सवितुरिति मन्त्रः
जातवेदसे इति मन्त्रः, त्र्यम्बकं यजामहे इति मन्त्रः.
ततः प्राणायामा [illegible]:

९८ [illegible]—

गायत्र्युपस्थानं— [illegible]
[illegible]: शतपथब्राह्मणे १४-१५.
सावित्री— [illegible] मन्त्रो [illegible]:
[illegible]
शतपथे- बौधायनीयेऽपि- सावित्री [illegible]
[illegible]

वाजसनेयिभिः शतपथपाठो [illegible] एव
ग्राह्यः।
अत [illegible] सावित्री [illegible]
[illegible]:।

itized by eGangotri Funding: MIDF

शौच हरू गरेपछि सानो [illegible] लाउने.
ब्राह्मणहरू बाहिरबाट आउँदा धानगोडा खोद आउने.

ब्राह्मणहरूलाई [illegible] गरिन्छ.
मासुभात वा खुवाउने.
जाँदा फेरि आउनन्. आफ्नै फेरि [illegible].
कुशलता.

विशेषज्ञहरू सबैलाई नेपाल [illegible]. नेपालमा
सिकाउन राखेको [illegible] आउँछन्.
[illegible] ~~[illegible]~~ [illegible] विषयहरू.

/ विवाह गर्ने [illegible] - [illegible]
[illegible]
[illegible].

/ ब्राह्मणहरू [illegible]
[illegible].
[illegible]
[illegible]
[illegible]
[illegible].

[illegible]

[illegible]
[illegible].
[illegible]
[illegible]
नास.

[illegible] ब्राह्मण [illegible].
[illegible]

दान [illegible].

[illegible]

१ [illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible] -
२। [illegible]
[illegible]
[illegible]

पुनः -
३। [illegible]

[illegible]

[illegible] -
[illegible]
[illegible]

[illegible] —
[illegible]
[illegible]

[illegible] —

विष्णोराचमनम्.
अपसर्पन्तु ये भूताः
[illegible]
आसनशोधनम्
भूतशुद्धिः प्राणप्रतिष्ठा
अन्तर्बहिर्मातृकान्यासः
षडङ्गन्यासाः
[illegible]
ध्यानम्
जपः
मुद्राप्रदर्शनम्
पूजा
पूजान्ते [illegible]
[illegible]
जपादौ जपान्ते [illegible] जपान्ते —
जपनिवेदनम्
विसर्जनम्
[illegible]

[illegible]

विष्णोराचमनम्.
प्राणायामसंकल्पः
प्राणायामः
मार्जनं - आपो हि ष्ठा
गायत्र्या अर्घ्यदानम्
आसनशोधनम्.
भूतापसारणम्
भूतशुद्धिः
न्यासः
जपः
~~[illegible]~~
~~[illegible]~~
प्राणायामः
ऋष्यादिषडङ्गन्यासः
जपनिवेदनम्.
मुद्राप्रदर्शनम्
[illegible]
[illegible]
विसर्जनमुद्रा
[illegible]
गायत्रीतर्पणम्

[illegible] [illegible]
[illegible].

ऋग्वेदीयसन्ध्याविधाने — दीपिकायाम्.

आत्मशोधनम्.
[illegible]
विनियोगपूर्वं प्राणायामः
आचमनम्
आपो हि ष्ठेति मार्जनम्.
अघमर्षणम्.
आचमनम्
सूर्यार्घ्यः
सूर्योपस्थानम्.
[illegible]
गायत्रीन्यासः
हृदयादिन्यासः
हृदयादिन्यासः
[illegible] न्यासः
वर्णन्यासः
त्रिपदान्यासः
गायत्र्यावाहनम्.
जपः
जपान्ते [illegible]
गायत्र्युपस्थानम्. [illegible]
विसर्जनम्. [illegible]

आचमनादि विष्णोराचमनम्.
प्राणायामम्.
अपवित्रः पवित्रो वा
आसनशोधनम्
प्रणवव्याहृतिगायत्र्यादिन्यासः
विनियोगपूर्वं प्राणायामः
आचमनम्.
आपो हि ष्ठेति मार्जनम्.
[illegible]
[illegible]
अघमर्षणम्.
सूर्यार्घ्यः [illegible]
[illegible]
गायत्र्यावाहनम्.
[illegible]
ध्यानम्.
[illegible]
मुद्राप्रदर्शनम्.
जपः
[illegible]
[illegible]
षडङ्गन्यासः
[illegible]

[illegible]

[illegible]

ततः [illegible]

[illegible]

[illegible]

स्मृतिः

उपाध्यायान्

[illegible]

[illegible]

आचार्यत्व [illegible]

उपाध्यायोऽथाचार्याः

कात्यायनसूत्रे—

[illegible]

[illegible]

४।८।३३ को   नं. ३ शाखा   १

~~(२)~~

ऐन्द्रीशान्तिः

अद्येहेत्यादि ऐन्द्रीशान्तिकर्माधिकारसिद्ध्यर्थे प्रायश्चित्तगोदानं

प्रतिज्ञासङ्कल्पः-

अहं मम दुर्ग्रहयोगवशाद्भौमदिव्यान्तरिक्षोत्पातादिवशात् परकृताभिचारादिवशात् अस्मस्या दैवप्रकोपोपसर्गादिवशाद्वा आत्मनो राष्ट्रे समुपजायमानस्य प्रकृतिक्षोभ राजप्रजावैमनस्यात्मक जाल भेदादि परस्परकलहभया निवारण पूर्वकं राजाधिराजेन्द्र देवानां पाद प्रसादद्वारा राजप्रजावर्गपरस्परानुराग पूर्वकं सर्वदोषोपशान्तिसमन्वित परस्पर सौमनस्य सुख सुभिक्ष सर्वलोकगतराजवश्यत्व राजाज्ञा वश्यत्वादि निर्विघ्न चिरकाल राज्यस्थैर्या श्रुतिस्मृतिपुराणोक्ताभीष्टफलावाप्त्यर्थे आथर्वणोक्तरीत्या ऐन्द्रीशान्तिं तदङ्गतया इन्द्रप्रतिमापूजन हवनादिकर्म करिष्ये।

एतत्कर्मसिद्ध्यर्थे एभिर्गन्धपुष्पाक्षतधौतोत्तरीयादिभिः

-- गोत्रं शर्माणमाचार्यत्वेन नानानामगोत्रान् ब्राह्मणान् ऋत्विक्त्वेन युष्मानहं वृणे इति वृणुयात्।

ततः पुण्याहवाचनम्।

दीपं कलशं गणेशं च सम्पूज्य। विधानोक्तरीत्या निर्मितायां वेद्यां प्रयोगोक्तरीत्या संस्कारं विधाय अग्निं प्रज्वाल्य सामिन्नप होमं कुर्यात्।

अग्नेरीशानभागे कलशं संस्थाप्य गन्धसर्वौषधि दूर्वा पञ्चपल्लव पञ्चरत्नवस्त्रयुग्मपञ्चामृत सप्तमृत्तिकापुष्पफल पञ्चशस्यादीनि निःक्षिपेत् ।

अग्नेः पूर्वतो गोमयोपलिप्तवेद्यां वस्त्रेणाच्छाद्य तदुपर्यष्टदलं कमलं विलिख्य तदुपरि कलशं तदुपरि स्थाल्यां अष्टदलं विलिख्य तत्र पल्लवदर्भादि । सौवर्णीमिन्द्रप्रतिमां संस्थाप्य त्रातारमिन्द्रमिति आवाह्य इमा आप इति स्नानीयं समर्प्य षोडशोपचारैः सम्पूज्य सुवर्ण छत्र चामर ध्वजपताकादिभी राजोपचारैश्च सम्पूज्य

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः ॥
विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ।

पौलोम्यालिङ्गिताङ्गाय सहस्राक्षाय ते नमः । इति पुष्पाञ्जलिं समर्पयेत् ।

ततो होमं वेद्यामग्निस्थापनादि कृत्वा अभ्यातानराष्ट्रभृत्प्राजापत्येन होमादि संस्रवहोमान्तं कृत्वा अग्नेः समन्तात् दिक्पालेभ्यो माषभक्तबलीन् दद्यात् । क्षेत्रपाल बलिं च दत्वा उच्छ्वेकोद्वासनान्तं पूर्णाहुत्यन्तं समापयेत् ।

यजमानस्याभिषेकः

अद्येहेत्यादि· अस्मिन्प्राचीन राजसिंहासने अन्याधिकार्युपवेशनजनित दोषपरिहारपूर्वकं सविशेषशुभार्थं शुद्धिविधानं करिष्ये· इतिसङ्कल्प्य, ॐ भूर्भुवःस्वः इति पञ्चगव्येन सम्प्रोक्ष्य.
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः। पुण्डरीकाक्षाय नमः पुण्डरीकाक्षः पुनातु॥
इति संप्रोक्ष्य.

ॐ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन· महेरणाय चक्षसे॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः· उशतीरिव मातरः॥
तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ· आपो जनयथा च नः॥
इति कुशोदकेन सिञ्चेत्। राजसिंहासनाय नमः इति पूजयेत्।

सुमुहूर्ते उपवेशनम् -

ॐ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे।
ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयम्॥
ध्रुवं ते वरुणो राजा ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥
ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि।
अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

राज्ञो वरासनं नाम श्रीसिंहासनमुच्यते ।
अभिषेकपूर्वं शुभमासवर्षे सुन्दर वेला । तीथे चन्द्रयोगे ।
कालोऽभिषेकस्थान नितीतलावे सिंहासनावस्थावेचिंबदाले ॥

सिंहासनचक्रे निवारि पूर्वसमये नहि धारयेत् :
ईदृशे च समायोगो उपविष्टो यथासने ।
असाध्य शत्रुसंघातं भेद छत्रं [illegible] से: ।

रूपवद्भार्य: ग्रामिणम् अर्धर्च: एत प्रयोगा विग्रह प्रदर्शन पूर्वकं सविशेषं साधनीया:

२ द्विगु तत्पुरुषयो भेदि प्रदर्श्य अचतुर विचतुर,इतिसूत्र भविकलं पूरयत.

३ आदित्य: गार्ग्यायणि: महाकुल: वेतस्वान्भासिक: एषु सूत्रं तद्धित कार्य मुपदिश्य प्रमाणे विधाय मानानां द्वयसच् दघ्नच् मात्रच् प्रत्ययाना मर्थं पार्थक्य स प्रमाणं दर्शयत ;

४ अतिसुत्वरि कुरुचरी जानपदी साधीयान् लघुता: इदानीम् इष्टी गव्यम् शुनासीरीयम् वासुदेव: युधिष्ठिर: दाक्षायणम्.

उपरि निर्दिष्टेषु स्वेच्छयाष्टानामेवसाधन प्रकारो दर्शनीय: .

(१) रुद्राध्याय प्रयोगः- (नानाग्रन्थोक्त) —

रुद्राध्यायको जप अथवा होम अथवा शिवजीलाई अभिषेक यस्तो तीन किसिमको विधान छ. यसमा श्री शिवजीको पूजा गरी ११ प्रकारको न्यास समेत गरी ११ आवृत्तिको रुद्रैकादशिनी, त्यसको ११ गुना रुद्र महा अतिरुद्र ~~महारुद्र, त्यसको ११ गुना अतिरुद्र~~ हुन्छ. त्यसको महिमा यस्तो लेखिएको छ.

रुद्रैकादशिनी सेवा सर्वकाम फलप्रदा ।
सर्वपापक्षयकरी सर्वशान्ति प्रदायिनी ॥
सर्वकामकरो होम तथा सर्वत्र शान्तिदः ।
अजाविकानां अश्वानां कुञ्जराणां तथा गवाम् ।
मनुष्याणां नरेन्द्राणां बालानां योषितामपि ।
ग्रामाणां नगराणां च देशानामपि भार्गव ।
उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च ।
मरके समनुप्राप्ते रिपुजे च तथा भये ।
रुद्र होमः परा शान्तिः पायसेन घृतेन वा ॥

अर्थात् ११ आवृत्ति रुद्राध्यायको पाठले मात्र पनि सर्वपाप निवृत्ति सर्वशान्ति हुन्छ. यसले विधिपूर्वक पायस घृतले होम गर्नाले सर्वत्र शान्ति हुन्छ पशु मनुष्य राजा बालक स्त्रीहरूको र ग्राम देश नगर हरूमा व्याधि महामारी शत्रुभय सर्वोपद्रव हरूको शान्ति हुन्छ. केवल पाठ वा रुद्राभिषेकको पनि यही किसिमको फल लेखिएको छ।

(२) अष्टाक्षर शिवमन्त्र (ह्रीँ ॐ नमः शिवाय ह्रीँ) को प्रयोग (शारदोक्त)

मनुलक्षं जपेन्मन्त्रं तत्सहस्रं यथाविधि।
जुहुयान्मधुरासिक्तैः राजवृक्ष समिद्वरैः।
एवं यो भजते मन्त्री देवेशं तमुमापतिम्।
स भवेत्सर्वलोकानां प्रियः सौभाग्य सम्पदः।

अर्थः शिवजीको पूजा गरेर यो मन्त्र १४ लाख जप गरी त्रिमधुले मिसाएको राजवृक्षको समिधाले १४ हजार होम, १४०० तर्पण १४० मार्जन १४ ब्राह्मण भोजन रूप पुरश्चरणले समस्त जनहरूको प्यारो हुन्छ सौभाग्य सम्पन्न पनि हुन्छ।

(३) शतचण्डीविधान (मेरुतन्त्रोक्त)

एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः।
राज्यं धनं यशः पुत्रा। नेष्टमन्यल्लभेत च॥

१० ब्राह्मणद्वारा ५ दिनमा न्याससहित शतचण्डीपाठ देवीको पूजा गरी पाँचौँ दिनमा पायस त्रिमधु दाख केरा बिमिरो उखु नरिवल जाइफल आँप आदि वस्तुले दशांशले नवार्णमन्त्रले १० हजार होम गरी ब्राह्मणलाई सुवर्ण दक्षिणा भोजन दिई शतचण्डीविधान गर्नाले जगत् वशमा पर्दछ सब उपद्रवहरू नाश हुन्छन् राज्य, यश धन कीर्ति पुत्रप्राप्ति आदि सम्पूर्ण इष्टफल प्राप्ति हुन्छ। यसमा मण्डप समेतको प्रयोग विशेष फलदायी छ,

(४) संवत्सर अनुसार देवीको विशेष पूजा (देवीपुराणोक्त) -

जन्म व्याध्यादिका क्षीणे दुःखाने कदाचिदाप्नुयात् ।
आधिव्याधिकृता पीडा तस्मिन्देशे नो भवेत् ।
सुभिक्षं क्षेममारोग्यं गजवाजि सदोज्ज्वलम् ।
हेमरत्नाकराकीर्णं राष्ट्रं तस्य प्रजायते ।
पर्जन्यः कालवर्षी स्यात् सस्याढ्या च वसुन्धरा ।
यज्ञकर्मकरा विप्रा गावो भूरिपयोन्विताः ।
सर्वाः पतिव्रता नार्यो भृत्याः स्वामिपरायणाः ।
नोपसर्गोपमृत्युर्वा तत्र देशे भवेत्क्वचित् ।
यत्रेयं सततं पूजा देवीनां क्रियते शुभे ॥

